


**ISSN Print:** 2394-7500
**ISSN Online:** 2394-5869
**Impact Factor:** 8.4
IJAR 2021; 7(8): 53-57
www.allresearchjournal.com
Received: 15-06-2021
Accepted: 18-07-2021

**दिपेश कुमार चौधरी**
का.सिं.द.सं.वि.वि. कामेश्वरनगर,
दरभंगा, बिहार, भारत

**Corresponding Author:**
**दिपेश कुमार चौधरी**
का.सिं.द.सं.वि.वि. कामेश्वरनगर,
दरभंगा, बिहार, भारत

# कृत्प्रत्ययानां स्वरूप दृष्ट्या वर्गीकरणम्

**दिपेश कुमार चौधरी**

**प्रस्तावनाः**

**1, सरूपा** :– समान रूपं यस्य स सरूपेः। तद्यथा–तव्यत् तव्य एधितव्यम्, कर्तव्यम् भवितव्यम् इत्यावदयः।

यत– चेयम् जेयम् चिद्यातोः जिघातोः रूपम्।
दाधातोः देयम, ग्लैघातोः ग्लयेम्।
शप् धातोः शप्यम् लभधातोः लभ्यम् ।
शक् धातोः शकयम् सहधातोः सहयम्
गद् धातोः गद्यम्, मद्धातोः मद्यम् चर
धातोः चर्यम् इत्यादयः।
यम् उपरमे–यम्यम्
गेयम्। पेयम्। चेयम्। तक हसने–तक्यम्।

शसु हिंसायाम्– शस्यम्। यते याचने यत्यम् जनी। प्रादुर्भावे जन्यम्। वद्यम्। शप् आक्रोश शप्यम्। डुलभष प्राप्तौ–लभ्यम्। शक्लृशक्तौ– शक्यम्। षहमर्षणे–सह्यम्। गद व्यक्तायांवाचि– गद्यम्। मदीहर्षे–मद्यम् चर गति भक्षणयोः – यर्यम्।

यम उपरमे–यम्यम्।
अवधंपापम्। अनुद्यमन्यत्। पापिनां नाम अवधं भवति। गुरोर्नाम अनुद्यमं भवति।
उभयत्रापि अवकृव्य मित्यर्थ एव। पण्यः कम्बलः। पाण्याः गौः।
वह्यम् – वहत्यनेनेति वह्यं शकटम्।
अजर्यम्– न जीर्यति इति अजर्मं संगतम्।
कयप् – ब्रह्मोद्यम्, ब्रह्मबद्यम्। ब्रह्मवेदस्त स्यवदनमित्यर्थः। ब्रह्मभूयं गतः। ब्रह्मत्वंगत इत्यर्थः।
ब्रह्मणो हननं ब्रह्मम हत्या। अश्वस्यहननं अश्वहत्या।
इण् गतौ – इत्यः ष्टुञ् स्तुतौ – स्तुत्यः।
शासु अनुशिष्टौ– शिष्यः।
दृङ् आदरे, आङ् पूर्वः– आदृत्यः।
जुवी प्रति सेवनयोः – जुष्यः।
शंसुस्तुतौ – शस्यम्, शंस्यम्।
दुह प्रपूरणे –दुह्यम्–गोह्यम्। वृतु वर्त्यम्। वृधु वृध्यम्।

खनु अवदारणे–खेयम्। डुभृञ् धारणपोषणयोः – भृत्याकर्मकराः। भृर्त्तव्यो इत्यर्थः। संभृत्या सम्यक् भर्त्तव्या इत्यर्थः।

मृजूषशुद्धौ परिमृज्यः, परिमार्ग्यो वा।

राज्ञो सोतव्यः = अभिषवद्वारा निष्पादयितव्यः क्रतु इत्यर्थे कर्मणि, राजा = लतात्मकः सोमः, सूयते = कण्डूयतेऽत्रेत्यर्थे अधिकरणे वा राजो पपदात् 'षञ् अभिषवे' इति धातोः कयप्, दीर्घश्च निपात्यते।
सूर्यः –सरत्याकाशे इत्यर्थे 'सृगतौ' इति धातोः, सुवति = लोकं प्रेरयति इत्यर्थे 'षु प्रेरणे' इति धातोर्वा कर्तरि कयप्, रूडागमश्च निपात्यते।
मृषेद्यम् – मृष, इत्युपपदाद वद् धातोः कर्मणि कयप् प्रत्ययो निपात्यते। मृषोद्य शब्दोक विशेष्य निघ्नः।

उच्चाय सौन्दर्य गुणा मृषोद्याः इति।
रूच्यः – रोचते इति रूच्यः, रूच् धातोः कर्तरिकयप् प्रत्ययौ निपात्यते।

कुप्यम् – गुप्गोपने इत्यस्माद्, गुप रक्षणे इत्यस्माद् वा घातोः कर्मणि क्यप् प्रत्ययः, गुपेरादेः कुत्वं च निपात्यते। सुवर्णरजत भिन्नं धनं कुप्यं भवति। गोप्यमन्यत्।
कृष्टपच्चाः – कृष्टे स्वयमेव पच्यन्ते इत्यर्थे कृष्टोप पदात् पच् धातोः कयप् प्रत्ययः कर्मकर्तरि निपात्यते। शुद्धे–कर्मणि तु कृष्ट पाक्याः इति।

अव्यथ्यः – न व्यथते इत्यर्थे कर्तरि क्यप् प्रत्ययो निपात्यते।

मिदिर विदारणे – भिनति कूलं यः, सः मिद्यः यः सः उद्धयः नद्यः कर्तरि क्यप्। झसय धत्वं च निपात्यते।

पुष् पुष्टौ– पुष्यन्त्यस्मिन्नर्था इति पुष्यः। अधिकरणे क्यप्।
षिधु संराद्धौ – सिध्यन्त्यस्मिन्नर्था इति सिद्धयः। अत्राप्यधिकरणे कयप्।

णीञ्–प्रापणे – विनीयकल्कः। कल्कः पिष्टः औषधि विशेषः, पापमिति वा। जि अभिभवेजित्यो हलिः। बलेन क्रफ्टव्य इत्यर्थः। कृष्ट सभी करणार्थ यत्स्थूल काष्ठं तद् हलिरित्युच्यते। प्रति ग्राह्यम्। अपिग्राह्यम्।

पदे – अवगृह्यम्, प्रगृह्यं वा पदम्।
प्रतिग्राह्यम्। अपिग्राह्यम्।
पदे – अवगृह्यम्, प्रगृह्यं वा पदम्।

अस्वैरी = परतन्त्रः, अस्मिन्नर्थे–गृह्यकाः शूकाः। पञ्जरादिबन्धनेन परतन्त्री कृता इत्यर्थः डुकृञ् करणे–कृत्यम्।

वृषु सेचने – बृष्यम्।
पत्रेऽर्थे 'युग्यम्' इति निपात्यते।
पत्रम् = वाहनम्।
युग्यो गौः। शकटादिना योक्रव्य इत्यर्थः। 'युजिरयोगे' इत्यस्मात् क्यप् कृत्वं च निपात्यते।
प्यत् – अमासह वसतोऽस्यां चन्द्रार्को इति अमावास्या, अमावस्या वा।

कृ–कार्यम्। हृ–हार्यम्। वच वाच्यम्, वाक्यम्। पच पाक्यम्। अवश्यं भवः आवश्यकम् अवश्यं भवेनीयम् – भाव्यम्।

अवश्यं पवनीयम् – पाव्यम्।
आङ पूर्वः षु प्रसवैश्वर्य योः – आसाव्यम्। यु मिंश्रवो–याव्यम्।
डुवप् बीज सन्ताने–वाप्यम।
रपलप व्यकृायांवाचि–राप्यम्। लाप्यम्। त्रपूष लज्जायाम्–त्राप्यम्। चमु अदने आचाम्यम्।

नयतेराङ् पूर्वाण्यत् प्रत्ययः आयादेशश्च निपात्यते आनाय्यो दक्षिणाग्नि दक्षिणाग्नि विशेषः प्रणाय्यः इति निपात्यते असम्मतौ। न विद्यते सम्मतिः = पूजा, आदरो वा यस्मिन् सोऽसम्मतिः, तस्मिन्नभिधेयं प्रपूर्वान्नयतेव्यत्, आयादेश्च निपात्यते इत्यर्थः। पार्य्य मानम्। मीयतेऽनेनेत्यर्थे 'माङ्माने' इति धातोर्ण्यत, आदेः षत्वं च निपात्यते। मेयमन्यत्। सान्नाच्यं हविः। सम्यग् नीयते होमार्थमग्निं प्रति इत्यर्थे। सम्पूर्वान्नयतेः कर्मणि व्यत्, आयादेशः, उपसर्ग दीर्घत्वं च निपात्यते। सन्नेयमन्यत्।
निकाय्योनिवासः निचीयते धान्यादिकमस्मिन् इत्यर्थे निपूर्वाच्चिनोतेरधिकरणेव्यत्, आयादेशः कुत्वं च निपात्यते। निचेयमन्यत्।
धाय्या सामिधेनी। धीयतेऽनयासमिदित्यर्थे धाञोकरणे व्यत प्रत्ययः निपातनाद भवति। आतोयुक्रेचिण्कृतो इति सूत्रेण युगागमः। सामेधिनी शब्द ऋगब विशेषस्य वाचकः। धेयमन्यत्। कुण्डपाय्यः क्रतु। कुण्डेनपीयते सोमोऽस्मिन्नित्यर्थे कुण्डोपपदात् 'पापाने' इति धातोरधिकरणे यत्प्रत्ययः युक् च निपात्यते।
संचाय्यः क्रतुः। संचीयतेऽसौ इत्यर्थे सम्पूर्वाच्चिनोतेः कर्मणिव्यत्। आयादेशश्च निपात्यते।
परिचाय्यम् उपचाय्यः स्चिनोतेण्यदायादेशौ निपात्येते। समूह्य चिन्वीत पशुकामः। सम्पूर्वाद् वहेः हलन्तत्वाण्य्त् सिद्ध एव। तत्र सम्प्रसारण, दीर्घत्वं च निपात्यते।

**2, असरूपाः** – न समानं रूपं यस्य सोऽसरूपः 'ण्वुलतृचौ' [1] धातोः ण्वुलतृचौ प्रत्ययो भवतः। कारकः, कर्ता। हारकः, हर्ता।
नन्दि ग्रहि पचादिभ्यो यथा संख्यं ल्यु, णिनि, अच् इत्येते प्रत्ययाः भवन्ति।[2] नन्द्यादिभ्यो ल्युः – नन्दयतीति नन्दनः। जनमर्दयतीति

जनदिनः। मधुं सूदयतीति मधुसूदनः। विशेषेण भीषयते विभीषणः। ग्रहयादिभ्योणिनिः – गृहणानीति ग्राही। तिष्ठातीति स्थायी। मन्त्रयतीति– मन्त्री। पदादिभ्यो अच–पचतीतिपचः। वक्तीति वचः। वदतीतिवदः। चलतीति चलः। पततीति पतः। नदतीति– नदट्–नदः, नदी। चनतीति चराचरः, चरो वा। चलतीति चलाचलः चलो वा। पततीति पतापतः, पतो वा वदतीति वदा वदः, वदो वा। हन्तीति घनाघनः, हनो वा।

इगुपद्या दिभ्यः कः प्रत्ययो भवति।

इगुपद्य–क्षिपः। लिखः। बुधः। कृशः।

ज्ञा–अवबोधन–जानातीतिज्ञः।

प्रीञ– तर्पणे प्रीणाति प्रियः। कृ–विक्षेपेकिरेतीति किरः।

उपसर्गे उपपदे आदन्तधातोश्च कः प्रत्ययो भवति। प्रस्थः। सुग्लः। सुम्लः। पादिभ्यो शप्रत्ययो भवति।[3]

पा–पिवः। घ्रा–जिघ्रः ।ध्मा– धमः। धेट् धयः। दृश– पश्य।

लिम्पु, विन्द, धारि, पारि, वेदि, उदेजि, चेति, साति, साहि – इत्येतेभ्यश्च शप्रत्ययो भवति।[4]

लिप–उपदाहे–लिम्पतीति लिम्पः।

विद्लृ–लाभे–विन्दतीति विन्दः।

घृञ् धारणे, घृङ् अवध्वसने, घृङ्आदरे, हेतुमण्णौ धारयतीति धारयः पृपालन पूरणयोः, इति क्रयादिः हेतु मण्मिाच् पारयतीति पारयः। ज्ञानाधर्थाः 'विद्ज्ञाने' इत्यादयः हेतुमण्णिजन्ताश्च–वेदयतीति वेदयः।

**3. अव्यवस्वरूपाः**– न व्यय इति अव्ययः। 'कृन्मेजन्तः'[5] मकारान्तः एजन्तश्च यः कृत्संज्ञकः प्रत्ययः, तदन्तं शब्दस्वरूपमव्यय सं भवति। मान्त–स्मारं स्मारम्।

एजन्त–जीवसे, पिबध्यै।

'क्त्वा–तोसुन्कसुनः'[6]

क्त्वा–तोसुन्–कसुन् इत्येवमन्तं शब्दस्वरूपम् अव्ययसंज्ञं भवति।

कृत्वा–कृत्वा, हृत्वा। तोसुन्–पुरा सूर्यस्यो देतो रोधेयः। कसुन पुरा क्रूरस्य विसृपो विरप्शिन्।

'अव्ययीभावश्च'[7]

अव्ययी भावश्चाव्यय संज्ञको भवति।

अधिहरि। प्रत्याग्नि, उपाग्नि शलभाः पतन्ति।

**4. कृत्या** :– प्राङ तवुलः इतः परम ण्वुल तृथौ इति सूत्रात् प्राक् येये प्रत्ययाः वक्ष्यन्ते ते कृत्यसंज्ञकाः ज्ञेयाः। कृद्तिङ इति सूत्रेण ते कृत्संज्ञकाः अपि तेन कृतद्धित समासाश्च इ इति प्राति पदिकत्वं सिध्यति। कृत्यप्रकरणं कृत्प्रकरणस्य अवान्तरप्रकरणम्। संज्ञासूत्रमिदम्। कृत्य–संज्ञा प्रदेशाः 'कृत्येरधिकार्थ वचने कृत्यानां कर्तरि वा इत्यादयः। त्रिविद्याः कृत्प्रत्ययाः कर्तृवाचकाः, कर्मादि वाचकाः, भाववाचकाश्च। तेषु ये कर्मवाचकाः भाववाचकाश्च ते कृत्याः इत्यमिधीयन्ते। कृत्य इति प्राचाम् अन्वर्थ संज्ञा सादृश्यमूला यादृक् कृत्य इत्यत्र त्य प्रत्ययः तादृशाः कृत्याः। प्रत्ययानाम् अर्थ निर्देशः, 'कर्तरिकृत' इत्यादिषु सूत्रेषु वर्तते।

'तव्यत् तव्यानीयरः' – धातोः पस्तात तव्यत्, तव्य, अनीयर इत्येते कृत्य संज्ञकाः कृत्प्रत्येया भवन्ति। कृ–कर्त्तव्यम्। ह–हर्तव्यम्। घटः कर्तव्यः। घटे करोति इत्यत्र घटः कृधातोः कर्म। अतः तेन कर्मणा कर्तव्यशब्दस्य सामानाधिकरण्यम्। अतः तव्य प्रत्ययः कर्म वाचकः। एवम् अनीयर प्रत्ययः। घटः करणीयः। ये तु अकर्मकाः धातवः तेभ्यः कृत्य प्रत्यया भावे भवन्ति। त्वचाहसितव्यम्। तथोरेव इति, सूत्रे स्पष्टे विद्यते। तव्यदादीनां कृत्य–प्रत्ययानां त्रयोऽर्थाः आवश्यकत्वम्– ब्रह्मचारिभिवैदोऽध्येतव्यः। शक्यत्वम्– ज्ञातस्य शब्दस्य अर्थो बोद्धव्यो भवति। अर्हता गुरुजनः आर्दतव्यः। योग्यता सतां मार्गोऽनुसर्तव्यः। तव्यत् इति तकारोऽनुबन्धः 'तित्स्वरितम्' इति स्वरितत्वाय शिरंसि उर्ध्वरेखा स्वरितस्य चिह्नम्।

वा केलिमर उपसंख्यानम्– तव्य–प्रत्ययवत् धातोः केलिमर प्रत्ययो भवति इति वकृव्यम्। ककारोऽनुबन्धः, गुण वृद्धिः – निषैधार्थः। रेफोऽनुबन्धो रिति इति मध्यमोदात्तत्वाय। पच–पचेलिमाभाषाः। पक्तुम् अभीष्टः पक्तुं योग्या वा। भिदेलिमा मृद्घटः।

**5. द्विरूक्तार्थका** :–

'बहुलमाभीक्ष्ण्ये'[7] आभीक्ष्ण्ये गम्यमाने सु प्युपपदे धातोर्बहुलम्णिनि प्रत्ययो भवति। आभीक्ष्ण्यम् = पौनः पुण्यम्।

कषायपायिणो गान्धाराः। क्षीरपायिन उशीनराः। सौवीरपायिणो बाह्लीकाः। 'आभीक्ष्र्णये ण्मुल च'[8]

समानकर्तकयोर्धात्वर्थयोर्मध्ये पूर्वकाले आभीक्ष्ण्य विशिष्टेऽर्थे वर्तमानाद धातोर्णमुल प्रत्ययो भवति, चकाराते कत्वा च।

आभीक्ष्ण्यम् = पौनः पुण्यम्। भोजं भोजं व्रजति, भुक्त्वा भुक्त्वा व्रजति। 'आमी' क्ष्ण्ये द्वे भवतः इत्युप संख्यानाद णमुलन्तस्य, कत्वोन्तस्यच द्विर्वचनम्।

'नित्य = वीप्सयोः'[9]

नित्यवीप्सयोः (द्योतयोः) सर्वस्य द्वे भवतः।

नित्य = आभीक्ष्ण्यं, पौनः पुण्यं वा।

द्रव्यानां युगपद् क्रियागुणाभ्यां व्याप्तुम् = सम्बन्धुम्, इच्छा वीप्सा।

आभीक्ष्ण्यं तिङन्तेषु, अव्यय संज्ञक–कृदन्तेषु च भवति, वीप्सा च सुप्सु। आभीक्ष्ण्ये–पचति, पचति। भुक्त्वा भुक्त्वा व्रजाति। भोजं भोजं व्रजति। लुनीहि भुनीहि इत्येवायं भुनाति।

वीप्सायाम् – ग्रामो–ग्रामो रमणीयः। पुरुषः पुरुषो निधनमुपैति। स्मारं स्मारं नमति गुरुम्। स्मृत्वा स्मृत्वा इत्यर्थः।

'सर्वस्यद्वे'[10]

'सर्वस्य' द्वे इति पदद्वयम् अधि क्रियते पदस्य (8/1/16) इत्यतः प्राक्।

'तस्यपरमाम्रेडितम'[11]

तस्य = द्विरुक्रस्य परम आम्रेडित सज्ञं भवति। कांस्कान् भोजयति। अत्र कानाम्रेडिते इति सूत्रेण पूर्वस्य कान इति शब्दस्य नकारस्य स्थाने आम्रेडिते परे रूर्भवति।

'अनुदात्त च'[12]

तस्य = द्विरूक्तस्य परम अनुदात्तं च भवति अर्थात् आम्रेडित संज्ञके शब्दे सर्वे स्वरा अनुदाता भवन्ति।

भृङक्ते भुङक्ते। पशून् पशून्।

'परिवर्जने'[13]

वर्जनेऽर्थे वर्तमानस्य परेः सर्वस्य द्वे भवतः। परिपरि त्रिगर्तेभ्यो वृष्टोदेवः। वर्जनम् = परिहारः।

(वा0) परिवर्जनेऽसमासे वेति वक्तव्यम् परि परि त्रिगर्तेभ्यो वृष्टो, देवः परिगर्तेभ्यः। समासे तु तेनैवो कृत्वात् वर्जनस्य नैव भवति–परि त्रिगतं वृष्टोदेव इति।

'प्रसमपोदः पादपूरणे'[14]

पादपूरणे प्र, सम, उप्, उत् इत्यतेषां सर्वस्य द्वे भवतः। प्र प्रा यमग्निर्भरतस्य श्रृण्वे। सं समिधुवसे वषन्। उपोप मे परामृंश किं नो नदुदु हर्ष से दातवा।

'उपर्यध्यधसः सामीप्ये'[15]

उपरि, अधि, अधस–इत्येतेषां सर्वस्य द्वे भवतः। सामीप्यं द्विविधं–कालकृतं देशकृतं च। कालकृतसामीप्यस्योदाहरणम्–उपर्युपरिदुःखम्।

देशकृत सामीप्यस्योदाहरणं–उपर्युपरिग्रामम्। अध्यधिग्रामम्। अद्योऽधो नगरम्।

'वाक्यादेरामन्त्रितस्यासूयासम्मति–कोपकुत्सन–भर्त्सनेषु'[16]

वाक्यादेशमन्त्रितस्य सर्वस्य द्वे भवतः, असूया–सम्मति–कोप–कुत्सन्– भर्त्सनेषु अर्थेषु।

असूयायाम् सुन्दर! सुन्दर! वृथातेसौन्दर्येम्। सम्मतौ–देव! देव! वन्धोऽसि। कोपे दुर्विनीत! दुर्विनीत! दूदानीं ज्ञास्यसि कुत्सने–धातुष्क! धानुष्क! वृथा तेधनुः भर्त्ने–चोर! चोर! धातर्मिष्यामि त्वाम्

'एकं बहुवीहिवत्'[18]

द्वि क्रम् एकम्। एकमित्येतच्छव्दस्वरूपम् बहुव्रीहिवद् भवति।

बहुव्रीहिवद् भावेन सुब्लोप–पुंवद भावौ भवतः। एकैकमक्षरं पठति।

एकैकया आहुत्या जुहोति।

एक शब्दस्य वीप्सायां नित्यवीप्सयोः इति सूत्रेणाद्विर्वचनम्।

'आबाधे च'[19]

आवाधे (धोत्ये सर्वस्यद्वे भवतः, बहुव्रीहिवच्च। आवाधः = पीड़ा। गतगतः। गतगता। नष्टः नष्टः। नष्ट नष्टा।)

'कर्मधारयवदुतरेषु'[20]

कर्मधारयवत् उतरेषु (उत्तरसूत्रैः कृतद्विर्वचनेषु। कार्यं भवति इत्येतद् वेदितव्यम्।)

कर्मधारयवद्भावेन सुब्लोपपुंवद भावान्तोदात्तत्वानि भवन्ति।

सुब्लोपः – पटु पटुः। पुंवद्भावः– पटुपट्वी। अन्तोदातत्त्वम् पटु पटुः।

आम्रेडितत्वेन सर्वानुदातता न भवति अपि तु कर्मधारयवद् भावेन समासान्तोदात्तत्वं भवति इत्याशयः।

**6, इत्संज्ञकवर्णदृष्ट्या –**

0 (शून्य) प्रत्ययः द्विषः (शत्रुः), मास, दिव, परिषद्।

अ – श्रम, ग्रह, वेद, पच, भार, आय, जय।

अक – कारक, पावक, रजक, नर्तक।

अत् – जरन्, अर्हन् (शतृ)

अथु – वेपथुः, श्वधु।

अन – गमन, पवन, पावन।

अना – अर्हणा, अर्चना, वेदना।

अनि – अकरणिः।

अन्त – कुर्वन् गच्छन्।

अनीय – दर्शनीय, स्पृहणीय।

अम् – स्मारंस्मारम्। स्वादुकारं भुङ्क्ते।

अस् – इश्वरो विलिखः। वितृदः।

आ – (अ प्रत्यय एव स्त्रियाम्। वाधा, व्रज्या चिकीर्षा।)

आक् – जल्पाक्, चलाक।

ान् – चिक्यान्, चिन्वान, ब्रुवाण, शयान।

आरू– वन्दारू, चारू।

आल – स्पृहयालु, निद्रालु।

इ – विधि, निधि, पपि, ददि, कारि।

इक् – वृश्चिक।
इका – प्रवाहिका, शायिका।
इत्र – (द्व+ज) भवित्र, खनित्र, पवित्र, चरित्र।
इन् – स्थायिन, ग्राहिन्।
इन – सांकूटिन (3/3/44)
इमन् (इ + मन) तनिमन् प्रथिमन्।
इष्ठ – जविष्ठ, वरिष्ठ।
इष्णु – भविष्णु, वर्धिष्णु (दू+ष्णु)
इस् – रोचिस्, सर्पिस्,, ज्योतिस्, दृविस्।
ई – नदी, शमी, तरी।
ईक – मृडीक, हृषीक्, चर्करीक, पर्फरीक।
ईयस् – वरीयस्, श्रेयस, जीवयस्।
उ – मृदु, साधु, स्वादु, मनु, भिक्षु।
उक – भावुक, कामुक, अभिलाषुक, पादुक, धातुक।
उर – मदुर, भिदुर, भासुर, विदुर, छिदुर, भयङ्कर।
उस् – चक्षुस्, जनुस्, यजुस।
उक् – जाकरूक, दन्दशुक, वावदूक, योजजूक।
त – कृत, श्रुत, गत (इ+त) पठित।
तर – तृ।
तवेत् – कृतवत् (त + वत्)
तवे, तवै – कर्तवे, कर्तवै (कर्त्तुम् इत्यर्थः छन्दसि)।
तव्य – कर्तव्य (तु + य)
ति – कृति, मति, भूति।
तु – तन्तु, जन्तु, सक्तु, जृतु, क्रोष्टु।
तुम – कर्तुम्, यातुम् (इ + तुम्) पठितुम्
तृ – कर्तृ, गन्तृ, ग्रहीतृ (ई +तृ), वोधयितृ।
तोस् – ईश्वरोऽभिचरितोस् (अभिचरितुम् इत्यर्थः छन्दसि)
त्नु – द्रवित्नु, जिघत्नु (छन्दसि)
त्र – पत्र, वस्त्र, श्रोत्र, अस्त्र, राष्ट्र, मन्त्र।
त्रिम – कृत्रिम।
त्वा – कृत्वा।
थ– रिक्थ, शपथ, शोथ, तीर्थ, गाथा।
ध्यै – पिबध्यै (पातुम् छन्दसि)।
न – प्रश्न, उष्ण, स्वप्न, यज्ञ।
नज् – स्वप्नक्।
नि – हानि, ग्लानि, वह्नि,। सारणि, तरणि, धरणि।
नु– सूनु, धेनु, गृघ्नु विष्णु।
म – धर्म, भाम, शर्म, मर्म, होम, स्तोम।
मन् – सुदामन्, अश्वथामन्, कर्मन्, जन्मन्, वेश्मन्, दामन्।
मर – धस्मर।
मान – वर्धमान।
मि –भूमि, लक्ष्मि, रश्मि।
य – हव्य, श्रव्य, कार्य, कृत्य, भृत्य।
यु – वायु, मन्यु, मृत्यु, पायु।
र – नम्र, कम्प्र, शुक्र, हिंस्र, गृघ्र, धीर।
रु – भीरु, चारु, वन्दारु।
भु – दयालु, स्पृहयालु, पतयालु।
वन् – सुधीवन्, पारदृश्यवन्, यज्वन्, विद्वन्स।

**सन्दर्भ–ग्रंथ सूची :**


1. पाणिनि सूत्र 3/1/133
2. पा0 सू0 3/1 /134
3. पाणिनि सूत्र 3/1/137
4. पा0 सू0 3/1/138
5. पाणिनि सूत्र 1/1/39
6. पा0 सू0 1/1/40
7. पा0 सू0 1/1/41
8. पाणिनि सूत्र 3/2/81
9. पाणिनि सूत्र 3/4/82
10. पा0 सू0 8/1/4
11. पा0 सू0 8/1/1
12. पाणिनि सूत्र 8/1/2
13. पा0 सू0 8/1/3
14. पा0 सू0 8/1/5
15. पा0 सू0 8/1/6
16. पाणिनि सूत्र 8/1/7
17. पा0 सू0 8/1/8
18. पा0 सू0 8/1/9
19. पा0 सू0 8/1/10
20. पाणिनि सूत्र 8/1/11